
ISSN-2277-6443

# विद्यारश्मिः

## राष्ट्रियवार्षिकशोधपत्त्रिका

## Annual National Research Journal

## 2015



योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
NAAC द्वारा A श्रेण्यां प्रमाणितम्
(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)
क.जे.सोमैया-संस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई-77

Scanned with CamScanner

# वाक्यस्वरूपं वाक्यार्थविचारश्च

✍प्रो. अर्चना दुबे

(व्याकरणन्यायमीमांसावेदान्तकाव्यादिशास्त्राणि समालोच्य वाक्यस्यैकादशलक्षणानि, महावाक्यलक्षणानि, एकवाक्यतास्वरूपं च सभेदं निरूप्य वाक्यार्थनिरूपणक्रमे भट्टानुयायिनामभिहितान्वयवादं, प्रभाकरानुयायिनामन्विताभिधानवादं, वैयाकरणानां वेदान्तिनां चा-खण्डवाक्यार्थवादं विन्यस्य मम्मटाचार्यस्य व्यवहारदशां परमार्थदशां चासेव्यात्र "वाक्यस्वरूपं वाक्यार्थविचारश्चे"ति निबन्धे दुबेऽपरनामभाजाऽऽचार्यया किमपि तादृशं सङ्कलनं सविवरणं प्रस्तूयते, येनैकत्र कृते प्रयासे एव बहुत्र प्रसरितवाक्यतत्त्वलाभोऽधीतिनां स्यादिति भावयामः। तत्र सर्वेऽप्याचार्याः तत्तच्छास्त्रप्रतिनिधयः अधिगततथ्याः सन्तीति तथापि तेषां लक्षणे तद्विवेचने च भैन्यं कुतो जागर्तीति न शङ्क्यम्, दृष्टिभेदेन बोद्धृभेदेन च एकस्यापि वस्तुनो भिन्नस्वरूपवत्त्वात्। वाक्यवाक्यार्थस्वरूपविषयेऽपि इत्थमेव भाव्यम्। अत्र दृष्टित्रयम्- अनुगमात्मिका, व्यवहारात्मिका, परमार्थात्मिका च। आसु एव दृष्टिषु तत्तल्लक्षणानि विमृश्यानि। वस्तुतस्तु एकेन लक्षणेन सकलानि लक्षणानि अनुगन्तव्यानि चेत् "शब्दः वाक्यम्" इति समक्षमायाति। शब्दो नाम बोधकः। भगवता पाणिनिनाऽपि "वचोऽशब्दसंज्ञायाम्" इति सूत्रेण वाक्यपदे कुत्वाभावप्रतिपादनव्याजेन वाक्यं शब्दसञ्ज्ञात्वेन प्रत्यपादि । तथा चाधिकारिभेदेन यस्य यः बोधकः शब्दः, तस्य कृते तदेव वाक्यमिति पर्यवस्यति ।)

महाभाष्ये पतञ्जलिः वाक्यस्य लक्षणं दत्तवान् एकतिङ् । आख्यातं साव्ययकारकविशेषणं वाक्यम्। सक्रियाविशेषणं च । आख्यातं सविशेषणम् ।[१] मीमांसादर्शने वर्णितमस्ति यत् अर्थैकत्वादेकं वाक्यं साकांक्षं चेद् विभागे स्यात् ।[२] पदसमूहो वाक्यम् अर्थसमाप्तौ ।[३] मिथः साकांक्षशब्दस्य व्यूहो वाक्यम् ।[४] पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च । वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ।[५] पदसङ्घातजं वाक्यम् ।[६]

आख्यातशब्दः संघातो जातिः संघातवर्तिनी ।
एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ।।
पदमाद्यं पृथक् सर्वपदं साकांक्षमित्यपि ।
वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम् ।।[७]

अर्थप्रतिपादनद्वारा श्रोतुः पदान्तरविषयामर्थान्तरविषयां वाकाङ्क्षां जनयतां प्रतीयमान-परस्परान्वययोग्यार्थप्रतिपादकानां सन्निहितानां पदानां समूहो वाक्यम् ।[८] पदसमूहो वाक्यर्थ-परिसमाप्तौ।[९] आख्यातं साव्ययकारकविशेषणं वाक्यम्।[१०] श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-



Scanned with CamScanner

समाख्यानां समवाये पारदौर्बल्यम्-अर्थ-विप्रकर्षात् ।[११] वाक्यस्य अर्थोऽस्ति समभिहारः सहोच्चारणं वा। मीमांसादर्शनं वाक्यशास्त्रमपि अभिधीयते।

वाक्यं स्याद् योग्यताकांक्षासत्तियुक्तः पदोच्चयः।[१२] साहित्यदर्पणकारः वाक्योच्चयं महावाक्यम् आह। अभिनवकाव्यालङ्कारसूत्रे उक्तम्-नानादिक्कालावच्छिन्नानां वाक्यानां पुरुषार्थप्रवर्तकः समूहो महावाक्यम् ।[१३] यथा वाक्ये अर्थैकत्वं तथैव वाक्यानां समुच्चयेऽपि एकवाक्यतायां सत्यां महावाक्यं जायते। पतञ्जलिः वाक्येन सह महावाक्यस्य अस्तित्वमपि स्वीकृतवान् - सा चावश्यं वाक्यसंज्ञा वक्तव्या, समानवाक्याधिकारश्च।[१४]

सर्वं काव्यं महाकाव्यं च महावाक्यम्[१५] अस्ति। अभिनवकाव्यालङ्कारसूत्रकारः उत्तमोत्तमं काव्यं महावाक्यम् उक्तवान्। प्रबन्धे प्रकरणेषु वा प्रयुक्तान्यपि वाक्यानि एकवाक्यतां साधयन्ति। कुमारिलभट्टेनापि उक्तम् — **स्वार्थावबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया ।**

**वाक्यानामेकवाक्यत्वं पुनः संहृत्य जायते ।।**[१६]

एकवाक्यता द्विधा — पदैकवाक्यता वाक्यैकवाक्यता च । वेदान्तदृशा —

**उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।**

**अर्थवादोपपत्तिश्च लिङ्गतात्पर्यनिर्णये ।।**[१७]

महाकाव्ये जीवनस्य सर्वांगीणं रूपं प्रतिफलति त्रयाणां सकलः समुल्लासो जीवनम् (१/१/५)

**महालङ्कारघटितं महावाक्यसमन्वितम् ।**

**उत्तमोत्तमं भवेत् काव्यं पुरुषार्थप्रवर्तकम् ।।**

यथा रामायणं महाभारतञ्च । यथा वा रघुवंशशाकुन्तलोत्तररामचरितादीनि काव्यानि। वैदेशिके साहित्ये महाकवेः शेक्सपीयरस्य शोकान्तनाटकानि, टॉल्सटॉयकृतो वार एण्ड पीस इत्युपन्यासः, अन्ये चैवंविधाः प्रबन्धाः। स्वरव्यञ्जनसंयोगाद् वर्णो निर्मीयते खलु ।

**वर्णानाञ्चापि योगेन जायते शब्दनिर्मितिः ।।**

**स शब्दः प्रतिपादिकमव्युत्पन्नः समुच्यते ।**

**व्युत्पन्नश्चापि सुप्तिङ्भ्यां स एव पदमुच्यते ।।**

**पदानां योग्यताऽऽकाङ्क्षासन्निधित्रितयं विना ।**

**अशक्यं वाक्यनिर्माणं तस्मात् त्रयमपेक्षितम्।।**[१८]

वाक्यनिर्माणे प्रयुक्तानां सुप्तिङन्तपदानां मध्ये यावद्योग्यताऽऽकाङ्क्षासन्निधिगुणा न स्युः तावद् वाक्यनिर्माणमशक्यमेवास्ति । मीमांसकाः कुमारिलभट्टानुयायिनोऽभिहितान्वयवादिनो वदन्ति यत् तात्पर्या नाम्नी काऽपि वृत्तिरस्ति । तात्पर्यार्थोऽपि केषुचित् ।[१९]

आकाङ्क्षायोग्यतासन्निधिवशाद् पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीति अभिहितान्वयवादिनांमतम् ।



Scanned with CamScanner

आकांक्षा - श्रोतुः जिज्ञासा । योग्यता - पदार्थानां मिथः सम्बन्धे बाधायाः अभावः, यथा वह्निना सिञ्चति । सन्निधिः - पदार्थानामविलम्बेनोच्चारणं सन्निधिः ।

पदानां पृथगर्थानां या परस्परयोजिका ।
वाक्यार्थस्य च निर्मात्री वृत्तिः काप्यपरैव सा ।
तात्पर्याख्यां विदन्त्येनां पदार्थान्वयबोधिनीम् ।
वृत्तिं कौमारिलाः सर्वेऽभिहितान्वयवादिनः ।।[२०]

परन्तु प्रभाकरमतानुयायिनो मीमांसकाः पृथक् पदानामपि मिथः सन्दर्भसमन्वितमखण्डावबोधात्मकमेव ज्ञानं स्वीकुर्वन्ति । वाच्य एव वाक्यार्थ इति अन्विताभिधानवादिनः । विशिष्ट एव पदार्थो वाक्यार्थो न तु पदार्थानां वैशिष्ट्यम्।[२१] विशिष्टाः पदार्थाः (अन्वितपदार्थाः) अन्वितपदार्थानामेव बोधः अभिधया भवति । संकेतग्रहः अन्वितपदार्थेषु एव भवति । प्रवृत्तेः व्यवहारः अन्वितपदार्थे भवति अत एव तात्पर्यावृत्तेः आवश्यकता नास्ति ।

देवदत्त गामानय - इत्याद्युत्तमवृद्धवाक्यप्रयोगाद्देशान्तरं सास्नादिमन्तमर्थं मध्यमवृद्धे नयति सति अनेनास्माद्वाक्यादेवंविधोऽर्थः प्रतिपन्नः- इति तच्चेष्टयाऽनुमाय तयोरखण्डवाक्यवाक्यार्थयोरर्थापत्त्या वाच्यवाचकभावलक्षणं संबन्धमवधार्य बालस्तत्र व्युत्पद्यते, परतः चैत्र गामानय, देवदत्त अश्वमानय, देवदत्तगां नयइत्यादिवाक्यप्रयोगे तस्य तस्य शब्दस्य तं तमर्थमवधारयतीति अन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिकारिवाक्यमेव प्रयोगयोग्यमिति वाक्यस्थितानामेव पदानामन्वितैः पदार्थैरन्वितानामेव संकेतो गृह्यते इति विशिष्टा एव पदार्था वाक्यार्थः न तु पदार्थानां वैशिष्ट्यम् ।

अनन्वितोऽर्थोऽभिहितान्वये, पदार्थान्तरमात्रेणान्वितस्त्वन्विताभिधाने, अन्वितो वाच्यो विशेषस्त्ववाच्य एव इत्युभयनयेऽप्यपदार्थ एव वाक्यार्थः ।[२२]

वैयाकरणाः वाक्यार्थस्य अखण्डतां स्वीकुर्वन्ति। अखण्डस्फोटरूपशब्दः अखण्डवाक्यार्थस्य बोधको भवति। पदे न वर्णा विद्यन्ते वाक्येष्ववयवा न च। वाक्ये पदानामत्यन्तं प्रविवेको न कश्चन। ब्राह्मणार्थो यथा नास्ति कश्चिद् ब्राह्मणकम्बले । देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः।[२३]

वेदान्तमतेऽपि वाक्यार्थः अखण्डो भवति। सत्यं ज्ञानमनन्तं ब्रह्म, अहं ब्रह्मास्मि, एकमेवाद्वितीयं ब्रह्मइत्यादिवाक्यमखण्डमेव अखण्डं ब्रह्म बोधयति। यदाहुर्व्यासपादाः - अनवयवमेव वाक्यमनाद्यविद्योपदर्शितालीकपदवर्णविभागमस्या निमित्तम्।[२४] मम्मटाचार्येणोक्तम् यत् व्यवहारदशायां या प्रक्रियादशायां पदपदार्थविभागोऽङ्गीकार्य एव, अन्यथा व्युत्पन्नाव्युत्पन्नव्यवहारः (साधु-असाधुशब्दव्यवहारः) न स्यात् । अखण्डबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यः, वाक्यमेव च वाचकमृइति येऽप्याहुः, तैरप्यविद्यापदपतितैः वेदान्तिभिरपि दशाविशेषे व्यञ्जनाङ्गीकार्यैवेत्याह अखण्डबुद्धीत्यादि । पदपदार्थकल्पना कर्त्तव्यैवेति।[२५] अखण्डरसरूपकाव्यार्थः अखण्डवाक्यार्थेण बोधितो भवति सत्त्वोद्रेकादखण्डस्यप्रकाशानन्दचिन्मयः। काव्य-प्रकाशेऽपि अभिवनगुप्तस्य अभिव्यक्तिवाद इत्थं वर्णितोऽस्तितत्कालाविगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितिभावेन प्रमात्रा सकलस-

हृदयसंवादभाजा साधारण्येन स्वाकार इव भिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादि-जीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीण-मिवालिङ्गन् अन्यत् सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिक-चमत्कारी श्रृङ्गारादिक रसः ।[२६]

शब्दस्य वस्तुत एक एव अखण्डो व्यापारः। तेनैकेन सर्वे अर्था अवबुध्यन्ते, मुकुलभट्टः च लक्षणामपि एकस्मिन् अखण्डशब्दे स्वीकृतवान्।

विवर्तमानं वाक्तत्त्वं दशधैव विलोक्यते । संहृतक्रमभेदे तु तस्मिंस्तेषां कुतो गति ।[२७] अखण्डे तु वाक्यार्थेऽसौ लक्षणा परमार्थेन नास्ति ।[२८] वाक्यार्थ इव परमार्थः ।[२९] वाक्यार्थबोधे तु आध्यात्मिकी सत्ता समुन्मिलति ।

पदार्थज्ञाने सत्यपि वाक्यार्थबोधाभावे व्यवहारप्रवृत्तिः एव न स्यात् । यद्यपि पदार्थद्वारेणैव वाक्यार्थाऽवगमस्तथापि वाक्यार्थबोधकाले पृथक्पदार्थबोधो विलीयते । व्यङ्ग्यार्थसन्दर्भे तथ्यमिदम् उपन्यस्यति प्रकारान्तरेण ध्वनिकारोऽपि ।

यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते ।
वाच्यार्थपूर्विका तद्वत् पतिपन्नस्य वस्तुनः ।।
स्वसामर्थ्यवशेनैव वाक्यार्थं प्रथयन्नपि ।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते ।[३०] इति।।

**सन्दर्भाः**


१. महाभाष्ये, २-१-१, १-१-४४
२. मीमांसा, २-१-४६
३. मञ्जूषायाम्, पृ. १
४. शब्दशक्तिप्रकाशिका, श्लोकः १३
५. वाक्यपदीयम्, १-७३,
६. बृहद्देवता, २/११७
७. वाक्यपदीम्, २-१, २
८. तर्कभाषा, पृ. सं. १२८
९. कौटिल्य-अर्थशास्त्रम्, २/१०/२८
१०. महाभाष्ये, २/१/१, वा.९, भागः - २, पृ. ५३२
११. मीमांसादर्शने, ३-३-१४
१२. साहित्यदर्पणः, २-१
१३. अभिनवकाव्यालङ्कारसूत्रम्, १/४/४




Scanned with CamScanner

१४. महाभाष्ये, २-२-१

१५. पदानां मेलनेनैवाक्यं वाक्यानामपि मेलनैः ।
सञ्जायते महावाक्यं यच्च काव्यं निगद्यते ।। अभिराजयशोभूषणम्, ५१, पृ. ८७

१६. तन्त्रवार्त्तिकम् २.१

१७. न्यायकोशः, पृ. १५८

१८. अभिराजयशोभूषणम् ५७-६०, पृ. ८७

१९. काव्यप्रकाशः, २/६

२०. अभिराजयशोभूषणम्, ६२-६३, पृ. ८७

२१. काव्यप्रकाशः, ५/उल्लासः

२२. काव्यप्रकाशः, पञ्चम उल्लासः

२३. वाक्यपदीयम्, १-७३-७४

२४. बालबोधिनी, पृ. २५१-२५२

२५. उपायाः शिक्ष्यमाणानां बालानामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ।। - काव्यप्रकाशः, सटीकः पञ्चम उल्लासः

२६. काव्यप्रकाशः, चतुर्थ उल्लासः, काव्यप्रकाशः, सटीकः, पृ ९३

२७. अभिधावृत्तिमातृका, १२१

२८. उपरिवत्, पृ. ५८

२९. अभिनवकाव्यालङ्कारसूत्रम्, पृ. ८५

३०. ध्वन्यालोकः १/१०-१२



आचार्या
साहित्यविभागाध्यक्षा,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः
राजेन्द्र भुवन रोड, वेरावल
जिला गीर सोमनाथ,
गुजरात ३६२२६५
मो. नं. ०९५५८८७९८२१


❖❖❖

Scanned with CamScanner